# विवेकभास्करः

## संस्कृतविभागीयभित्तिपत्रिका

रामकृष्णमिशन्-विवेकानन्द-शैक्षणिक-शोधसंस्थानम्, वेलुड़मठ

उद्घाटकः - नागराज पातुरि

निर्देशकः - श्रीवेङ्कटरमणभट्टः, प्राध्यापकः, संस्कृतविभागीयः

सम्पादकः - श्रीकृष्णपदरुइदासः, आचार्यद्वितीयवर्षीयः

आलङ्कारिकः - श्रीशुभदीपपालः, आचार्यद्वितीयवर्षीयः

वर्षम् - ०५, विषयः - चाणक्यः।

प्रकाशनदिनाङ्कः - २२/०१/२०१९, वासरः - मङ्गलवासरः

# सूचीपत्रम्

सम्पादकीयम्....................3
॥जीवनदर्शनानि॥....................4
॥ चाणक्यजीवनचरितम् ॥....................5
॥ कौटिलीयम् अर्थशास्त्रम् ॥....................7
॥ राजनीतिज्ञः चाणक्यः ॥....................11

# सम्पादकीयम्

वयञ्जानीमो यद्राज्यस्य सर्वाधिकारी भवति राजा। तद्वचनानुसारेणैव राज्यं प्रचलति। राज्ञि सत्यपि राज्ये यद्यत्प्रचलति तत्सर्वं सम्यग्ज्ञात्वा राज्ञे उचितानुचितानि वक्तुं कश्चिदवश्यमेव भवति। स खलु मन्त्री एव यः राज्यस्योत्थानपतनकाले राजानं कृत्याकृत्यं बोधयति। एवमेव मन्त्रिषु अन्यतम आसीत् चाणक्यः। नन्दवंशस्य विनाशेन मौर्यसाम्राज्यस्य यशोवर्द्धनेन यथा महाराजनीतिज्ञोऽसौ अमरः सञ्जातः। तथैव अर्थशास्त्रनाम्ना अद्भुतमपरिहार्यम-सामान्यं च ग्रन्थं विरच्य अयं संस्कृतसाहित्ये स्वशास्त्रे सर्वोत्कृष्टं स्थान-मलङ्कुर्वन्दृश्यते। विष्णुपुराणे, मुद्राराक्षसनाटके च तस्य ससम्मानं नामग्रहणमेव वचनमुक्तं प्रमापयति। अपि च याज्ञवल्क्यवात्स्यायनकालिदासविष्णुशर्मादिग्रन्थ-कृद्भिः रचितानि शास्त्राणि काव्यानि च अर्थशास्त्रेण प्रभावितानि सन्तीति दृश्यते। आचार्यकामन्दकेन नीतिसारे एषः पितृप्रदत्तविष्णुगुप्तनाम्ना स्मृतः। तक्षशिलायामे-कस्मिन्नभिजातब्राह्मणपरिवारे सोऽजायत। तस्य पिता चणकः कश्चन ऋषिरासीदित्यस्ति जनश्रुतिः। चन्द्रगुप्तमौर्यसमसामयिकस्यास्य समयः प्रायः ख्रीष्टपूर्वचतुर्थशताब्दः स्वीकर्तुं शक्यते। अर्थशास्त्ररूपं नीतिकाव्यं लेखितुं समर्थो वेदादिसकलशास्त्रेषु पारंगत आसीत् इति स्वीकार्यमेव। तद्विरचितम् अर्थशास्त्रं नयशास्त्रं वा राजनैतिकविज्ञानस्य विश्वकोशः इत्युच्यते। कौटिल्यप्रणीत-नीत्यध्ययनेन तत्परिपालनेन च जीवनमस्माकं किं सुखकरं भवति वा इति जिज्ञासायामवश्यमेव तन्नीतयः सकृद्द्रष्टव्याः भवन्ति। संस्कृतजगति अमरत्वं प्राप्तं विष्णुगुप्तं विष्णुः कदा अस्माज्जुगोप इति विषयः अद्यावधि अज्ञायमानः अस्ति।

एवञ्च अस्मिन्नवसरे महाराजनीतिज्ञचाणक्यविषये अस्माभिः कश्चिन्नम्रः सत्प्रयासो विहितः। यद्येतद्भवतां सुधियां मनसि किञ्चिदपि आनन्दं जनयेत् तर्हि पत्रिकानिर्मातृषु अस्मासु असीमोत्साहसञ्चारो भवेदिति आशास्यते। धन्यवादः।

## ॥ जीवनदर्शनानि ॥

**- विप्लवविश्वासः, स्नातकतृतीयवर्षीयः।**

**"दारिद्र्यनाशनं दानं शीलं दुर्गतिनाशनम्।**
**अज्ञाननाशिनी प्रज्ञा भावना भयनाशिनी॥"**

मनुष्यजीवने दुःखकारणीभूता नैके हेतवो विद्यन्ते।सर्वेऽपि तान् प्राप्तुन्नेच्छामः। प्राप्ते सत्यपि तान्नाशयितुं प्रयत्नः क्रियते। तेषु प्रथमं तावद्दारिद्र्यम्। दारिद्र्यमिच्छुर्न कोऽपि जगति दृश्यते। अधुना लब्धे दारिद्रे तत उन्नत्यर्थं दानकर्म एव मुख्यं भवति इति चाणक्याचार्यः। दाने क्षये खलु पुनः प्राप्तिः। दुर्गतिरित्यन्यतमं दुःखकारणम्। तच्च उत्तमस्वभावेन नश्यते। अज्ञानमप्यन्यत्प्रधानं कारणम्। तन्नाशने परिस्कृतापरिशीलनक्षमा धीरेव समर्था। चतुर्थं तावद्भयम्। "भयादिन्द्रश्च वायुश्च भयात्तपति सूर्यः" - तत्रास्माकं का कथा।अतोऽस्य भयस्य नाशाय ईश्वरे भक्तिरेवास्माकं शरणम्।

**"सुखार्थी चेत्त्यजेद्विद्यां विद्यार्थी चेत्त्यजेत्सुखम्।**
**सुखार्थिनः कुतो विद्या कुतो विद्यार्थिनः सुखम्॥"**

जगति नियमोऽयमस्माभिः परिलक्षित एव यत्किमपि प्राप्तुमिष्यते चेदवश्यं तत्समानं किमपि त्यक्तव्यं भवति। अध्ययनकाले तु एतत्सम्यगनुभूयते। यतो हि विद्यार्जनं न हि सामान्यं किमपि कार्यम्। उत्तमं तपः विद्योपसानमेव। अतः विद्याभिलाषी चेत्सुखेन विद्या मे भविष्यतीति चिन्तयितारः विद्यार्जने मा प्रवर्तन्ताम् इति आदिशति चाणक्यः। अपि च सुखार्थिनः विद्यां त्यजेत्। विद्यार्थिनां सुखप्राप्तीच्छा सुखार्थिनां विद्याप्राप्तीच्छा च न कर्तव्येत्यर्थः।

## ॥ चाणक्यजीवनचरितम् ॥

**- विश्वरूपवेजः, आचार्यद्वितीयवर्षीयः।**

कौटिल्यविषये यावत् विवरणमुपलभ्यते ततः ज्ञायते यत् मौर्यसाम्राज्यस्य प्रतिष्ठापकस्य चन्द्रगुप्तस्य मन्त्रिरूपेण नन्दवंशध्वंसकारिरूपेण च तस्य प्रसिद्धिरासीत्। सः तक्षशीलायाः एकः विद्योत्साहिब्राह्मणपरिवारे जातः। स्वस्य तीक्ष्णबुद्धिप्रभावेण वेदादिसकलशास्त्राणां ज्ञानाहरणं कृत्वा नीतिशास्त्रेपि पारदर्शितां सम्पादितवान्। तस्य पिता चणकऋषिः आसीत्। चणकस्यापत्यं पुमान् चाणक्यः इति तन्नाम इति केचन। चणकनामकग्रामे तस्य जन्मः अभवत् इति कारणात् चणकगोत्रोत्पन्नत्वाद्वा तस्य नाम चाणक्यः इति जातमित्येवमपि केचन। एतद्विहाय विष्णुगुप्तः इति नाम्नाऽपि तस्य प्रसिद्धिरासीत्। कामन्दकीयनीतिसारे दण्डिनः दशकुमारचरिते विशाखदत्तस्य मुद्राराक्षसनाटके अन्यग्रन्थेषु च अर्थशास्त्रस्य रचयितृरूपेण विष्णुदत्तस्य नाम प्राप्यते। बहूनां मते विष्णुदत्तः न चाणक्यः अपितु भिन्नः कश्चन कविरासीत्। तेषां नये विष्णुदत्तः षष्ठशतकीयः किञ्च चाणक्यः सप्तमशतकीयः आसीत्। तथापि प्रमाणाभावात् बलपूर्वकं किमपि वक्तुमशक्यत्वात् प्रचलितमतानुसारेण विष्णुगुप्तः चाणक्यस्यैव अपरं नाम। तस्य पिताप्रदत्तं नाम आसीत् चाणक्यः इत्येव युक्तियुक्तः। सः चाणक्यः एकः रूद्रतेजब्राह्मणः आसीत्। सः कूटबुद्ध्या नन्दवंशस्य ध्वंसमकरोत् अपि च मगधसिंहासने चन्द्रगुप्तं प्रतिष्ठापयितुं साहाय्यं कृतवान्। "नीतिसारे" अस्य विषयस्य उल्लेखं कृत्वा कामन्दकः चाणक्यस्य कूटनैतिकज्ञानस्य विचक्षणतायाः च उपस्थापनं कृत्वा तं प्रति नमस्कारमकरोत्।

**"एकाकी मन्त्रशक्त्या यः शक्त्या शक्तिधरोपमः।**
**आजहार नृचन्द्राय चन्द्रगुप्ताय मेदिनीम्॥"**

विष्णुदत्तस्य चतुर्थं नाम भवति कौटिल्यः। एतन्नाम्नापि तस्य ख्यातिरासीत्। अर्थशास्त्रे सः कौटिल्यः इत्यस्य व्यवहारमकरोत्। यथा "इति कौटिल्यः" "नेति कौटिल्यः" इत्यादि। प्रकृतदृष्ट्या तु चाणक्यस्य इयमाख्या तस्य चारित्रिकवैशिष्ट्यमेव प्रतिफलयति। अर्थात् एकः एव जनः नामत्रयेषु प्रसिद्धः आसीत्। विष्णुदत्तः कौटिल्यश्च इति नामद्वयम् अर्थशास्त्रे उपलभ्यते। यथा ग्रन्थस्य प्रारम्भे उक्तमस्ति यत् "कौटिल्येन कृतं शास्त्रं विमुक्तग्रन्थविस्तरम्" इति। यद्यपि तस्य परिचयविषये सन्देहः वर्तते तथापि प्रसिद्धमतानुसारेण चाणक्यः चन्द्रगुप्तमौर्यस्य समसामयिकः आसीत्। तस्मात् अर्थशास्त्ररचयितुः चाणक्यस्य कालः ख्रीष्टपूर्वचतुर्थशताब्दः।

आर्यगुरुकुलपरम्परायां तस्य महती श्रद्धा आसीत्। नन्दवंशध्वंसकारिरूपेण मौर्यवंशस्य प्रतिष्ठायां

चाणक्यस्य राजनैतिक बुद्धिमत्तायाः परिचयो मुद्राराक्षसे सडिण्डिमुद्घोषितं वर्तते। एवं निरीहता,निःस्वार्थमयता लोकसंग्रहस्य महाभावना यस्मिन् पूर्णरूपेण प्राप्यते सः चाणक्यः इति कथ्यते।

अर्थशास्त्रं विरच्य चाणक्यः अस्मभ्यमूल्यममरं च एकं ग्रन्थं प्रादात्। येन तत्कालात् वर्तमानकालेऽपि तत्रोक्ता उपदेशाः निःसंकोचम् अस्माभिरनुसर्यते।

महानीतिज्ञोऽयं स्वस्यान्तिमजीवनं सन्न्यासं स्वीकृत्य व्यतीतवान्। लोकारक्षणाय तस्य उदारचिन्ता एव तं दिवमप्रापयत् इति जानीमः इति शम्।

## ॥ कौटिलीयम् अर्थशास्त्रम् ॥

**- शान्तिघोषः, आचार्यप्रथमवर्षीयः।**

**“न्यायवर्त्मप्रदातारं चाणक्यं चणकात्मजम्।**
**लोकधर्मप्रणेतारं भूयो भूयो नमाम्यहम्॥”**

शासनात् शंसनात् शास्त्रम् इति शास्त्रशब्दस्य निर्वचनम्। तत्र शासनं हि विधिप्रतिषेधगुणदोषादीनां प्रतिपादनम् , शंसनं च प्रतिपादितस्य विषयस्य संशयसमाधानादिना विवरणम्। उक्तलक्षणसंगमाद् अर्थशास्त्रं शास्त्रतां भजते। अर्थशास्त्रम् आथर्वणवेदस्य उपवेद इति प्रसिद्धम्। अनादिकालाद् राजधर्मोपदेशकम् इदं शास्त्रम्। राज्यस्य भूप्रदेशः प्रकृतयश्च अर्थाः इत्युच्यन्ते। एतस्य अर्थस्य योगं क्षेमं च उपदेशयच्छास्त्रम् अर्थशास्त्रम्। प्रजानां योगक्षेमप्रतिपादकं शास्त्रमिदं कौटिल्येन चाणक्यापरनामधेयेन प्रणीतम्। अर्थशास्त्रस्य इयं परिभाषा कौटिल्येन स्वशास्त्रे प्रदत्ता- "मनुष्याणां वृत्तिरर्थः। मनुष्यवती भूमिरित्यर्थः। तस्याः लाभोपायं शास्त्रम् अर्थशास्त्रम्" इति।

चाणक्यः चन्द्रगुप्तस्य प्रधानामात्यपदम् अलञ्चकार। महाराजाय चन्द्रगुप्ताय अनेन विष्णुगुप्तेन या राजनैतिकसंहिता निर्मिता सैव 'अर्थशास्त्रम्' इति नाम्ना अभिधीयते। अर्थशास्त्रमिदं राजनैतिकविज्ञानस्य 'विश्वकोश' इत्युच्यते। ग्रन्थेऽस्मिन् धर्मशास्त्रम्, नीतिशास्त्रम्, शिक्षाशास्त्रम्, समाजशास्त्रम्, कृषिविज्ञानम्, चिकित्साशास्त्रम्, तन्त्रशास्त्रम् इति नैके विषयाः वर्णिताः। आन्विक्षिकी, त्रयी, वार्ता दण्डनीतिश्चेति कौटिल्यमते चतस्रः विद्याः। तेषु दण्डनीतिरिति अर्थशास्त्रस्य पर्यायपदम्। का नाम दण्डनीतिरिति निरूपयति विष्णुगुप्तः- "आन्वीक्षिकी-त्रयी-वार्तानां योगक्षेमसाधनो दण्डः। तस्य नीतिः दण्डनीतिरि"ति। दण्डनीत्यामेव सर्वविद्यारम्भाः प्रतिबद्धाः भवन्ति। दण्डनीतिविषये कौटिल्यस्य मतमस्ति यत् तीक्ष्दण्डो हि भूतानाम् उद्वेजनीयः, मृदुदण्डः परिभूयते च। अतः यथार्थदण्डः भवेदिति। सुविज्ञातः प्रणीतो हि दण्डः प्रजाः धर्मार्थकामैः योजयति। अत्र आन्वीक्षिकी नाम तर्कविद्या। यया विद्यया उचितानुचितं तर्कपुरःसरं ज्ञायते सा विद्या आन्वीक्षिकीति कथ्यते। अर्थशास्त्रकारः कौटिल्यः लिखति स्वयमेतद्विषये- 'बलाबले चैतासां हेतुभिः अन्वीक्षमाणा आन्वीक्षिकी लोकस्य उपकरोति। व्यसने अभ्युदये च बुद्धिम् अवस्थापयति' इति। आन्वीक्षिकीं स्तौति स्वग्रन्थे-

**'प्रदीपः सर्वविद्यानाम् उपायः सर्वकर्मणाम्।**
**आश्रयः सर्वधर्माणां शश्वदान्वीक्षिकी मता'॥ इति।**

त्रयीति नाम ऋग्यजुःसाम्नां त्रयाणां वेदानाम्। एषः त्रयीधर्मः चतुर्णां वर्णानाम् आश्रमाणां च

स्वधर्मस्थापनाद् औपकारिकः। प्रत्येकम् आश्रमाणां स्वधर्मः अन्यस्माद् भिन्नः। अहिंसा, सत्यं, शौचम्, अनसूया, अनृशंस्यं, क्षमा च सर्वेषां वर्णानाम् आश्रमाणां च सामान्यः धर्मः अस्ति। इत्थं स्वधर्मः सर्वथा सर्वदा च स्वर्गाय आनन्त्याय च कल्पते।

**अर्थशास्त्रपरम्परा:**

पृथिव्याः लाभे पालने च यावन्ति अर्थशास्त्राणि पूर्वाचार्यैः प्रस्थापितानि प्रायशस्तानि संहृत्यैकमिदम् अर्थशास्त्रं कृतम्। महाभारतस्य शान्तिपर्वणि प्राचीनानाम् अर्थशास्त्रकाराणां नामोल्लेखः दृश्यते। तदनुसारेण मनु- बृहस्पति-शुक्र-पराशरव्यासप्रमुखाः नैके अर्थशास्त्रकाराः इति कौटिल्यः स्वकीये अर्थशास्त्रे उक्तवान्। पूर्वाचार्याणां सर्वान् ग्रन्थान् अवेक्ष्य तेषाम् अभिप्रायान् एकत्र संगृह्य एतच्छास्त्रं कृतमिति एषः स्वग्रन्थारम्भे प्रतिजानीते- "ओं नमः शुक्रबृहस्पतिभ्याम्" इति अर्थशास्त्रस्य मूलपुरुषौ शुक्राचार्यं बृहस्पत्याचार्यं च ग्रन्थारम्भे स्मरति।

**प्रकरणविभागः**

अर्थशास्त्रे अस्मिन् १८० प्रकरणानि, १५० अध्यायाः, १५ अधिकरणानि सन्ति। एतानि तन्त्रम्, आवापः, शेष इति त्रिषु भागेषु विभक्तानि। अधिकरणानि भवन्ति विनयाधिकारिकम्, अध्यक्षप्रचारः, धर्मस्थीयम्, कण्टकशोधनम्, योगवृत्तं, मण्डलयोनिः, षाड्गुण्यम्, व्यसनाधिकारिकम्, अभियास्यत्कर्म, सांग्रामिकम्, वृत्तसंघः, आबलीयसम्, दुर्गलम्भोपायः, औपनिषदिकम्, तन्त्रयुक्तिश्चेति पञ्चदश। आदौ पञ्चसु अधिकरणेषु स्वदेशहितचिन्तनं प्रतिपाद्यते। राज्ञ इन्द्रियजय एव प्रधानजय इति अभिधाय कामक्रोधद्यरिषड्वर्गवशान् पूर्वभूपान् विनष्टान् उदाहृत्य जितेन्द्रियान् यशस्विनः राज्ञः प्राशंसत्।

ग्रन्थकर्तृप्रशस्तिः

महाकविः भासः स्वस्य नाटकेषु तथा कालिदासः, माघः, भारविः च स्वेषां काव्येषु अर्थशास्त्रस्य तत्त्वानि चाणक्यः यथा आचचक्षे तैरेव शब्दैः छन्दोबद्धैः प्रत्यपादयन्। अपि च, एतेषां काव्यानां व्याख्यानकर्त्ता मल्लिनाथः सञ्जीवनी, घण्टापथः इत्याख्यव्याख्यासु च मध्ये मध्ये "यदाह कौटिल्यः" इत्युक्त्वा अर्थशास्त्रस्य कानिचन वाक्यानि उदाहरति। आचार्यस्य विष्णुगुप्तस्य शिष्यः कामन्दकः कामन्दकनीतिसाराख्ये स्वग्रन्थे कौटिल्यं प्राशंसत्-

**'नीतिशास्त्रामृतं धीमान् अर्थशास्त्रमहोदधेः।**

**समुद्दद्ध्रे नमस्तस्मै विष्णुगुप्ताय वेधसे॥ इति।**

ग्रन्थकर्ता कौटिल्यः स्वस्य अर्थशास्त्रस्य स्वयमेव व्याख्यां चकार। तत्र कारणम् एवं ब्रवीति-

**'दृष्ट्वा विप्रतिपत्तिं बहुधा ग्रन्थेषु सूत्रकाराणाम्।**

**स्वयमेव विष्णुगुप्तश्चकार सूत्रं च भाष्यं च'॥ इति।**

प्रकृतग्रन्थकर्तुः गर्वोक्तिरियं स्वविषये-

**'येन शास्त्रं च शस्त्रं च नन्दराजगता च भूः।**

**अमर्षेण उद्धृतान्याशु तेन शास्त्रमिदं कृतम्'॥ इति।**

अर्थशास्त्रस्य प्रभाव:

संस्कृतसाहित्ये कतिपयग्रन्थकाराणां कृतिषु अर्थशास्त्रस्य महान् प्रभावः परिलक्ष्यते। तद्यथा कालिदासस्य शाकुन्तलम्, रघुवंशम्, कुमारसंभवम् चेति कृतयः अर्थशास्त्रेण भृशं प्रभाविताः। याज्ञवल्क्यस्मृतिः, वात्सायनकृतं, कामसूत्रं चेत्येतेषाम् आधारभूतः अयं ग्रन्थः। पञ्चतन्त्रग्रन्थे अर्थशास्त्रं 'नयशास्त्रम्' इति नाम्ना अभिहितम्। विशाखादत्तसमकालीनः कविर्दण्डी कौटिलीयदण्डनीतेः अध्ययनोपरि स्वमतं प्रस्तुतवान्- "अधीष्व तावद् दण्डनीतिम्। तदिदम् इदानीम् आचार्यविष्णुगुप्तेन मौर्यार्थे षड्भिः श्लोकसहस्रैः संक्षिप्ता। सैवेयमधीत्य सम्यगनुष्ठीयमानयथोक्तकार्यक्षमते"ति। कुत्रचित् ग्रन्थे निन्दापि कृता शास्त्रस्य अस्य। यथा कादम्बरीकारः बाणभट्टः अर्थशास्त्रविषये निकृष्टदृष्टिं प्रकटयति- "किं वा तेषां साम्प्रतं येषाम् अतिनृशंसप्रायोपदेशे कौटिल्यशास्त्रं प्रमाणमि"ति।

ग्रन्थविषये विवाद:

अर्थशास्त्रस्य प्रणेता चाणक्य इति विषये केचन वैदेशिकविद्वांसः विचिकित्सन्ति। परन्तु अर्थशास्त्रस्य 'येन शास्त्रं च शस्त्रं च' इत्यादिकतिपयश्लोकसमुद्धरणेन तद्विषयकसंशयः निवार्यते। अर्थशास्त्रस्य प्रणेतृविषये यावान् विवादः ततोऽधिकः तस्य स्थितिकालविषये। अर्थशास्त्रस्य उद्धारकत्वेन येषां नामानि प्रथमतः समायान्ति तेषु प्रमुखः पण्डितशामशास्त्रीमहोदयः। अनेन मैसूरप्रान्तात् समुद्धृतः अयं ग्रन्थः,तत्र च कस्यचन अंशस्य प्रकाशनमपि विहितम्। परं च तेन सम्पूर्णोऽपि ग्रन्थः प्रकाशितः। तत्प्रकाशितग्रन्थस्य उपोद्घाते तेन स्पष्टम् इमे विषया उक्ताः- "कौटिल्यः चन्द्रगुप्तस्य अमात्यपदे नियुक्त आसीत्। अर्थशास्त्रं कौटिल्यस्य कृतिरस्ति। अर्थशास्त्रस्य अयं प्रामाणिकः मूलपाठः अस्ति" इति।

अर्थशास्त्रस्य सार्वभौमिकता:

यद्यपि राजनीतिः युगे युगे परिवर्तमानं, देशे देशे विभिन्नं सत् वैविध्यं भजते। युगधर्मानुसारं राजधर्मः अपि परिवर्तनशीलः दृश्यते। देशे विदेशेष्वपि आधुनिकराज्यशास्त्राणां भाषाः भिद्यन्ते, नतुसार्वजनीनाः नीतयः। यतः जनाः अर्थात् प्रजाः राज्ञः सकाशात् रक्षणम् इच्छन्ति। राजा तु सर्वाः

प्रजाः पुत्रवत् रक्षेत् न तु पीडयेत्। तादृशः राजा प्रत्यक्षदेवता इति प्रशंसापात्रं भवति। नीतिसूत्राणि कानिचन:

"सुखस्य मूलं धर्मः। धर्मस्य मूलम् अर्थः। अर्थस्य मूलं राज्यम्। राज्यस्य मूलम् इन्द्रियजयः। इन्द्रियजयस्य मूलं विनयः। विनयस्य मूलं वृद्धोपसेवा" इत्येतानि प्रमुखसूत्राणि शास्त्रस्य अस्य।

चाणक्यसूत्रेषु उपदेशा:

"आपत्सु स्नेहसंयुक्तं मित्रम्। मित्रसंग्रहणे बलं सम्पद्यते। शक्तिहीनः बलवन्तम् आश्रयेत्। दुर्बलाश्रयो दुःखम् आवहति। न देवचरितं चरेत्। राज्ञः प्रतिकूलं नाचरेत्। पूर्वं निश्चित्य पश्चात् कार्यम् आरभेत। कालवित् कार्यं साधयेत्। ज्ञानवतामपि दैवमानुषदोषात् कार्याणि दुष्यन्ति। नास्त्यप्राप्यं सत्यवताम्। सतां मतं नातिक्रमेत्। स्वजनेषु अतिक्रमो न कर्त्तव्यः। माता अपि दुष्टा त्याज्या। नास्ति सत्यात् परं तपः। सत्यं स्वर्गस्य साधनम्। अपराधानुरूपो दण्डः। अमरवद् अर्थजातम् अर्जयेत्। यः परार्थम् उपसर्पति सः सत्पुरुषः। पुरुषस्य मैथुनं जरा। शत्रोरपि सुगुणः ग्राह्यः। धर्मेण धार्यते लोक" इत्येते सार्वकालिका उपदेशाः चाणक्येन सर्वथापि प्रजानां हितायोपदिष्टाः सन्ति। तस्मात् प्रजाहितोपदेशकं शास्त्रमिदं वरीवर्ति इति शिवम्।

## ॥ राजनीतिज्ञः चाणक्यः ॥

**- चन्दनमुखार्जी, आचार्यप्रथमवर्षीयः।**

वीरभोग्या खल्वियं वसुन्धरा। वसुन्धरायामस्यां काले काले जगत्पालनार्थं लोकसंग्रहार्थं वा विद्यावतां पुरुषाणाम् आविर्भावः दृश्यते। अत्यन्तक्रूरेभ्यः नन्दवंशीयेभ्यः मातुः रक्षणाय मौर्यवंशस्य प्रतिष्ठा यस्य कीर्तिः, आर्यगुरुकुलपरम्परायां विद्यते महती श्रद्धा यस्य, महत्वाकांक्षी महाक्रोधी महानीतिज्ञश्च सन्नपि यः आसीत् निरीहः, वीतरागः लोकोत्तरः राजनीतिज्ञश्च। एवं निरीहता, निःस्वार्थमयता लोकसंग्रहस्य महाभावना यस्मिन् पूर्णरूपेण प्राप्यते सः चाणक्यः इति कथ्यते। विष्णुगुप्तः कौटिल्यश्च तस्य पृथक् नामधेयमासीत्। कुटलगोत्रजः चणकतनयः क्रीस्तपूर्वचतुर्थशतकेलक्ष्यशीलानामके प्रदेशे एकस्मिन् ब्राह्मणगृहे समुत्पन्नः। स्वकीये अर्थशास्त्रे विशाखादत्तप्रणीते मुद्राराक्षसे च चाणक्यस्य महत् चरितं प्राप्यते। मौर्यसाम्राज्यस्य प्रतिष्ठाता महामन्त्री च भूत्वापि स्वयं वैशेषिकसुखात् सर्वदा विरतः आसीत्। चाणक्यस्य राजनीतिक्षेत्रे तिस्रः दिशः उपलक्ष्यन्ते- राष्ट्रजीवनस्य दार्शनिकतत्वं, राजनैतिकादर्शवादः मनुष्यत्वे महाविश्वासश्च।

क) राष्ट्रजीवनस्य दार्शनिकतत्वं:

मुद्राराक्षसे नाटके राष्ट्रजीवनस्य दार्शनिकतत्वानि सम्यग्रूपेण वर्णितानि विद्यन्ते। चाणक्यः सर्वदा अखण्डभारतस्य स्वप्नं दृष्टवान्। यदा भारतवर्षे नन्दवंशीयानां नृपाणां शासनं चलति स्म तदा भारतवर्षस्य गौरवान्वितमहिमा कलुषा जाता। तदा भारतस्य पुनरुद्धरणाय चाणक्यस्य आविर्भावः। नन्दवंशीयान् धननन्दादीन् हत्वा मौर्यवंशस्य प्रतिष्ठा, अखण्डभारतस्य रक्षणाय चन्द्रगुप्तस्य अभिषेकः, साम्राज्यव्यवस्थायाः शक्तिवर्धनाय गुप्तचराणां नियुक्तिः, अनैतिककार्ये अपराधे कृते दण्डव्यवस्था इत्यादिषु समग्रेषु राष्ट्रकार्येषु चाणक्यसदृशः द्वितीयः अद्यापि नैव प्राप्यते। प्रत्येकः राष्ट्रः वाञ्छति सः राजतन्त्रात्मकः प्रजतन्त्रात्मकः भवेत् तदा राष्ट्रस्य उन्नतिः भवति। राष्ट्रस्य उन्नतिः तदा भवति यदा सर्वे नागरिकाः स्वस्वार्थं विहाय समाजस्य राष्ट्रस्य चिन्तनं कुर्युः। चाणक्यस्य आत्मत्यागः न तु राष्ट्रहितपरीक्षायै अपि तु राष्ट्रहितसफलतायै। जनरञ्जनपरतन्त्रतायां शासकस्य आत्मगौरवानुभवः हि चाणक्यस्य शासननियामकत्वम्। चाणक्यः एकः महान् राष्ट्रपुरुषः, यः राष्ट्रस्य कुते आत्मवलिदानाय सर्वदैव उद्यतः सन्नद्धः आसीत्। चाणक्यस्य दूता प्रणिधयः गुप्तचराः, तेषां स्वस्मिन् कार्ये कर्तव्यपरायणता आसीत् राष्ट्रस्य योगक्षेमसाधना। एवं महान् आदर्शः, परिपूर्णं राष्ट्रचिन्तनं, राष्ट्रस्य रक्षणं, राष्ट्रस्य प्रजापालनं, कर्तव्यता, दायवद्धता, हितकामना च चाणक्यस्य राजनैतिकं जीवनं दर्शनं च

व्याख्यान्ति। चाणक्यजीवनं गणतन्त्रस्य प्रजातन्त्रस्य वा आदर्शभूतं मूलमिति तु स्वीकर्तव्यमेव।

ख) राजनैतिकादर्शवाद:

राजनैतिकादर्शवादिना चाणक्यस्य व्यक्तित्वस्य केन्द्रशक्तिः आसीत्। हिन्दुप्रजातन्त्रस्य स्थापनाय चाणक्यस्य महती भूमिकासीत्। अर्थशास्त्रे सङ्घः कथं भवेत्, राज्ञः कार्यम्, मन्त्रिपरिषत्, शासनव्यवस्था, राजदूतः, गुप्तचरः, जनपस्थापना, वर्णाश्रमव्यवस्था, न्यायव्यवस्था, राज्यस्य आर्थिकसाधनं, राजकरः, आधुनिकसाम्राज्यवादः, इत्यादिविषये चाणक्यस्य सिद्धान्तः तस्य राजनैतिकादर्शवादं महिमान्वितं करोति।

अद्यतनीये विश्वे विश्वशान्तिविषये राजनैतिकाधिभूनां मध्ये उद्विघ्नता दृश्यते। तस्य प्रधानं कारणं भवति राष्ट्रनायकानां हृदयपरिवर्तनम्।अद्यतनीयाः राष्ट्रनायकाः राष्ट्रचिन्तनापेक्षया स्वस्य चिन्तने मग्नाःदृश्यन्ते एवं हृदयपरिवर्तनं विश्वस्य शान्तिवर्द्धनाय अहेतुकं भवति। सर्वैः राष्ट्रनायकैः विश्वशान्तिरक्षणाय साम्राज्यवादस्य त्यागः विधेयः। एवं सर्वेषां राष्ट्रहितकरं हृदयपरिवर्तनम् आवश्यकं भवति। तदा विश्वस्य राष्ट्रस्य शान्तिभावना रक्षिता भवति। इयमेव विश्वशान्तिभावना यत्र प्रजापालनं सुखकरं भवति। चाणक्यः-

**ब्राह्मणेनैधितं क्षत्रं मन्त्रिमन्त्राभिमन्त्रितम्।**

**जयत्यजितमत्यन्तं शास्त्रानुगतशस्त्रितम्।।**

एवं चाणक्यस्य राजनैतिकादर्शवादः विश्वशान्तिरक्षणाय अन्यतमं स्थानं भजते।